# Shri Kalika Hridayam

# શ્રીકાલિકાહૃદયમ્

## Document Information

Text title : Kalika Hridayam

File name : kAlikAhRidayam.itx

Category : hRidaya, devii, dashamahAvidyA, devI

Location : doc_devii

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay, NA

Description-comments : Mantramaharnava Dvitiya khanda Kalikatantra Taranga 4

Latest update : August 4, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીકાલિકાહૃદયમ્

કાલીરહસ્યે મહાકૌતૂહલ દક્ષિણાકાલી હૃદય સ્તોત્રમ્

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીઉમામહેશ્વરાભ્યાં નમઃ ॥

અથ શ્રીકાલીહૃદયપ્રારમ્ભઃ ।

શ્રીમહાકાલ ઉવાચ ।
મહાકૌતૂહલસ્તોત્રં હૃદયાખ્યં મહોત્તમમ્ ।
શ઼ૃણુ પ્રિયે મહાગોપ્યં દક્ષિણાયાઃ સુગોપિતમ્ ॥ ૧॥

અવાચ્યમપિ વક્ષ્યામિ તવ પ્રીત્યા પ્રકાશિતમ્ ।
અન્યેભ્યઃ કુરુ ગોપ્યં ચ સત્યં સત્યં ચ શૈલજે ॥ ૨॥

શ્રીદેવ્યુવાચ ।
કસ્મિન્ યુગે સમુત્પન્નં કેન સ્તોત્રં કૃતં પુરા ।
તત્સર્વં કથ્યતાં શમ્ભો દયાનિધે મહેશ્વર ॥ ૩॥

શ્રીમહાકાલ ઉવાચ ।
પુરા પ્રજાપતેઃ શીર્ષચ્છેદનં કૃતવાનહમ્ ।
બ્રહ્મહત્યાકૃતૈઃ પાપૈર્ભૈરવત્વં મમાગતમ્ ॥ ૪॥

બ્રહ્મહત્યાવિનાશાય કૃતં સ્તોત્રં મયા પ્રિયે ।
કૃત્યાવિનાશકં સ્તોત્રં બ્રહ્મહત્યાપહારકમ્ ॥ ૫॥

ૐ અસ્ય શ્રીદક્ષિણકાલ્યા હૃદયસ્તોત્રમન્ત્રસ્ય શ્રીમહાકાલ ઋષિઃ ।
ઉષ્ણિક્છન્દઃ । શ્રીદક્ષિણકાલિકા દેવતા ।
ક્રીં બીજમ્ । હ્રીં શક્તિઃ । નમઃ કીલકમ્ ।
સર્વત્ર સર્વદા જપે વિનિયોગઃ ॥

અથ હૃદયાદિન્યાસઃ ।

ૐ ક્રાં હૃદયાય નમઃ ।
ૐ ક્રીં શિરસે સ્વાહા ।
ૐ ક્રૂં શિખાયૈ વષટ્ ।
ૐ ક્રૈં કવચાય હું ।
ૐ ક્રૌં નેત્રત્રયાય વૌષટ્ ।
ૐ ક્રઃ અસ્ત્રાય ફટ્ ॥

ઇતિ હૃદયાદિન્યાસઃ ॥

અથ ધ્યાનમ્ ।
ૐ ધ્યાયેત્કાલીં મહામાયાં ત્રિનેત્રાં બહુરૂપિણીમ્ ।
ચતુર્ભુજાં લલજિહ્વાં પૂર્ણચન્દ્રનિભાનનામ્ ॥ ૧॥

નીલોત્પલદલપ્રખ્યાં શત્રુસઙ્ઘવિદારિણીમ્ ।
નરમુણ્ડં તથા ખડ્ગં કમલં વરદં તથા ॥ ૨॥

બિભ્રાણાં રક્તવદનાં દંષ્ટ્રાલીં ઘોરરૂપિણીમ્ ।
અટ્ટાટ્ટહાસનિરતાં સર્વદા ચ દિગમ્બરામ્ ॥ ૩॥

શવાસનસ્થિતાં દેવીં મુણ્ડમાલાવિભૂષિતામ્ ।
ઇતિ ધ્યાત્વા મહાદેવીં તતસ્તુ હૃદયં પઠેત્ ॥ ૪॥

ૐ કાલિકા ઘોરરૂપાઢ્યા સર્વકામફલપ્રદા ।
સર્વદેવસ્તુતા દેવી શત્રુનાશં કરોતુ મે ॥ ૫॥

હ્રીંહ્રીંસ્વરૂપિણી શ્રેષ્ઠા ત્રિષુ લોકેષુ દુર્લભા ।
તવ સ્નેહાન્મયા ખ્યાતં ન દેયં યસ્ય કસ્યચિત્ ॥ ૬॥

અથ ધ્યાનં પ્રવક્ષ્યામિ નિશામય પરાત્મિકે ।
યસ્ય વિજ્ઞાનમાત્રેણ જીવન્મુક્તો ભવિષ્યતિ ॥ ૭॥

નાગયજ્ઞોપવીતાઞ્ચ ચન્દ્રાર્દ્ધકૃતશેખરામ્ ।
જટાજૂટાઞ્ચ સઞ્ચિન્ત્ય મહાકાલસમીપગામ્ ॥ ૮॥

એવં ન્યાસાદયઃ સર્વે યે પ્રકુર્વન્તિ માનવાઃ ।
પ્રાપ્નુવન્તિ ચ તે મોક્ષં સત્યં સત્યં વરાનને ॥ ૯॥

યન્ત્રં શ‍ૃણુ પરં દેવ્યાઃ સર્વાર્થસિદ્ધિદાયકમ્ ।
ગોપ્યં ગોપ્યતરં ગોપ્યં ગોપ્યં ગોપ્યતરં મહત્ ॥ ૧૦॥

ત્રિકોણં પઞ્ચકં ચાષ્ટકમલં ભૂપુરાન્વિતમ્ ।
મુણ્ડપઙ્ક્તિં ચ જ્વાલાં ચ કાલીયન્ત્રં સુસિદ્ધિદમ્ ॥ ૧૧॥

મન્ત્રં તુ પૂર્વકથિતં ધારયસ્વ સદા પ્રિયે ।
દેવ્યા દક્ષિણકાલ્યાસ્તુ નામમાલાં નિશામય ॥ ૧૨॥

કાલી દક્ષિણકાલી ચ કૃષ્ણરૂપા પરાત્મિકા ।
મુણ્ડમાલા વિશાલાક્ષી સૃષ્ટિસંહારકારિકા ॥ ૧૩ ॥

સ્થિતિરૂપા મહામાયા યોગનિદ્રા ભગાત્મિકા ।
ભગસર્પિઃપાનરતા ભગોદ્યોતા ભગાઙ્ગજા ॥ ૧૪ ॥

આદ્યા સદા નવા ઘોરા મહાતેજાઃ કરાલિકા ।
પ્રેતવાહા સિદ્ધિલક્ષ્મીરનિરુદ્ધા સરસ્વતી ॥ ૧૫॥

એતાનિ નામમાલ્યાનિ યે પઠન્તિ દિને દિને ।
તેષાં દાસસ્ય દાસોઽહં સત્યં સત્યં મહેશ્વરિ ॥ ૧૬॥

ૐ કાલીં કાલહરાં દેવી કઙ્કાલબીજરૂપિણીમ્ ।
કાલરૂપાં કલાતીતાં કાલિકાં દક્ષિણાં ભજે ॥ ૧૭॥

કુણ્ડગોલપ્રિયાં દેવીં ખયમ્ભૂકુસુમે રતામ્ ।
રતિપ્રિયાં મહારૌદ્રીં કાલિકાં પ્રણમામ્યહમ્ ॥ ૧૮॥

દૂતીપ્રિયાં મહાદૂતીં દૂતીયોગેશ્વરીં પરામ્ ।
દૂતોયોગોદ્ભવરતાં દૂતીરૂપાં નમામ્યહમ્ ॥ ૧૯॥

ક્રીંમન્ત્રેણ જલં જપ્ત્વા સપ્તધા સેચનેન તુ ।
સર્વે રોગા વિનશ્યન્તિ નાત્ર કાર્યા વિચારણા ॥ ૨૦॥

ક્રીંસ્વાહાન્તૈર્મહામન્ત્રૈશ્ચન્દનં સાધયેત્તતઃ ।
તિલકં ક્રિયતે પ્રાજ્ઞૈર્લોકો વશ્યો ભવેત્સદા ॥ ૨૧॥

ક્રીં હૂં હ્રીં મન્ત્રજપ્તૈશ્ચ હ્યક્ષતૈઃ સપ્તભિઃ પ્રિયે ।
મહાભયવિનાશશ્ચ જાયતે નાત્ર સંશયઃ ॥ ૨૨॥

ક્રીં હ્રીં હૂં સ્વાહા મન્ત્રેણ શ્મશાનાગ્નિં ચ મન્ત્રયેત્ ।
શત્રોર્ગૃહે પ્રતિક્ષિપ્ત્વા શત્રોર્મૃત્યુર્ભવિષ્યતિ ॥ ૨૩॥

હૂં હ્રીં ક્રીં ચૈવ ઉચ્ચાટે પુષ્પં સંશોધ્ય સપ્તધા ।
રિપૂણાં ચૈવ ચોચ્ચાટં નયત્યેવ ન સંશયઃ ॥ ૨૪॥

આકર્ષણે ચ ક્રીં ક્રીં ક્રીં જપ્ત્વાઽક્ષતાન્ પ્રતિક્ષિપેત્ ।
સહસ્રયોજનસ્થા ચ શીઘ્રમાગચ્છતિ પ્રિયે ॥ ૨૫॥

ક્રીં ક્રીં ક્રીં હૂં હૂં હ્રીં હ્રીં ચ કજ્જલં શોધિતં તથા ।
તિલકેન જગન્મોહઃ સપ્તધા મન્ત્રમાચરેત્ ॥ ૨૬॥

હૃદયં પરમેશાનિ સર્વપાપહરં પરમ્ ।
અશ્વમેધાદિયજ્ઞાનાં કોટિકોટિગુણોત્તરમ્ ॥ ૨૭॥

કન્યાદાનાદિદાનાનાં કોટિકોટિગુણં ફલમ્ ।
દૂતીયાગાદિયાગાનાં કોટિકોટિફલં સ્મૃતમ્ ॥ ૨૮॥

ગઙ્ગાદિસર્વતીર્થાનાં ફલં કોટિગુણં સ્મૃતમ્ ।
એકધા પાઠમાત્રેણ સત્યં સત્યં મયોદિતમ્ ॥ ૨૯॥

કૌમારીસ્વેષ્ટરૂપેણ પૂજાં કૃત્વા વિધાનતઃ ।
પઠેત્સ્તોત્રં મહેશાનિ જીવન્મુક્તઃ સ ઉચ્યતે ॥ ૩૦॥

રજસ્વલાભગં દૃષ્ટ્વા પઠેદેકાગ્રમાનસઃ ।
લભતે પરમં સ્થાનં દેવીલોકે વરાનને ॥ ૩૧॥

મહાદુઃખે મહારોગે મહાસઙ્કટકે દિને ।
મહાભયે મહાઘોરે પઠેતસ્તોત્રં મહોત્તમમ્ ।
સત્યં સત્યં પુનઃ સત્યં ગોપાયેન્માતૃજારવત્ ॥ ૩૨॥

ઇતિ કાલીરહસ્યે શ્રીકાલીહૃદયં સમાપ્તમ્ ॥

દક્ષિણકાલિકાહૃદયં ચ

Encoded by Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by Gopal Upadhyay, NA

*Shri Kalika Hridayam*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*